तौषारं, क्ली, ( तुषारस्येदम्। तुषार+"तस्येदम्।"४।३।१२०। इत्यण्।) तुषारजलम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते।१।४५।
"धारं कारं तौषारं हैममिति॥")

त्यक्तं, त्रि, ( त्यज्यते स्मेति। त्यज त्यागे+क्तः।) कृतत्यागम्। तत्पर्य्यायः। हीनम् २ विधुतम् ३ समुज्झितम् ४ धूतम् ५ उत्सृष्टम् ६। इत्यमरः।३।१।१०७॥ विनाकृतम् ७ विरहितम् ८ निर्व्यूढम् ९। इति त्रिकाण्डशेषः॥ ( यथा, रामायणे।२।३७।२।
"त्यक्तभोगस्य मे राजन्! वने वन्येन जीवतः।
किं कार्य्यमनुयात्रेण त्यक्तसङ्गस्य सर्व्वतः॥")

त्यज, औ हानौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) औ, अत्याक्षीत्। हानिर्व्वर्ज्जनम्। त्यजति दुष्टलोकं जनः। इति दुर्गादासः॥

त्यजन, क्ली, ( त्यज+भावे ल्युट्।) त्यागः। वर्ज्जनम्॥

त्यत्, [ द् ] त्रि, ( त्यजति संसर्गमिति। त्यज्+"त्यजितनियजिभ्यो डित्।" उणां १।१३१। इति अदिः स च डित्।) तत्। सेइ इति भाषा। अस्य पुंलिङ्गस्त्रीलिङ्गयो रूपं स्यः स्या। सर्व्वनामशब्दोऽयम्। इति व्याकरणम्॥ ( यथा, ऋग्वेदे।१।६३।४।
"त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्
वृषकर्म्मन्नुभ्नाः॥")

त्यत्, [ द् ] क्ली, (त्यज्+"त्यजितनीति।"उणां।१।१३१। इति अदिः स च डित्।) वायुः। आकाशः। यथा,—
"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥"
इति भागवते।१०।२।२६॥

"सत्यव्रतमिति। सत्यं व्रतं सङ्कल्पो यस्य तम्। सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्व्वं प्रलयानन्तरं स्थितिसमये च सत्यं अव्यभिचारेण वर्त्तमानम्। तदेवाहुः सत्यस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ एवं सच्च त्यच्च सत्यं भूतपञ्चकम्। 'तत् सत्यमित्याचक्षते।' इति श्रुतेः। तस्य योनिं कारणम्। अनेन सृष्टेः पूर्व्वं वर्त्तमानतोक्ता। तथा सत्ये तस्मिन्नेव निहितं अन्तर्यामितया स्थितम्। अनेन स्थितिसमयेऽपि सत्यत्वमुक्तम्। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं नाशेऽप्यशिष्यमाणरूपम्। अनेन प्रलयेऽप्यवशिष्टत्वेन सत्यत्वं दर्शितम्। एवं त्रिसत्यत्वमुपपादितम्। तथा ऋतसत्यनेत्रं ऋतं सूनृता वाणी सत्यं समदर्शनम्। तथा भगवता व्याख्यास्यमानत्वात्। सत्यञ्च समदर्शनम्। ऋतञ्च सूनृता वाणी कविभिः परिकीर्त्तिता इति। तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्व्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्ना इत्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥

त्यागः, पुं, ( त्यज्+घञ्।) दानम्। इत्यमरः।२।७।२९॥ ( यथा, रघुः।१।७।
"त्यागाय सम्भृतार्थानां सत्याय मित-
भाषिणाम्॥")
वर्ज्जनम्। इति मेदिनी। गे, ८॥ ( यथा, मनुः।८।३८९।
"न माता न पिता न स्त्री न पुत्त्रस्त्याग-
मर्हति॥")
विवेकिपुरुषः। इति शब्दरत्नावली॥ सर्व्वकर्म्मफलविसर्ज्जनम्। यथा,—
"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥
त्याज्यं दोषवदित्येके कर्म्म प्राहुर्म्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः॥
यज्ञो दानं तपः कर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि च कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्ज्जुन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥"
इति श्रीभगवद्गीतायाम्।१८।२-९॥
( त्रि, दाता। यथा, ऋग्वेदे।४।२४।३।
"मिथो यत्त्यागमुभयासो अग्मन् नरः स्तोकस्य
तनयस्य सातौ॥"
"उभयास उभये यजमानाः स्तोतारश्च त्यागं त्यागकर्त्तारं दातारमिन्द्रं अग्मन् उपगच्छन्ति॥" इति सायनः॥ )

त्यागिमः, त्रि, (त्यागेन निर्वृत्तः। भावप्रत्ययत्वादिमप्।) त्यक्तः। त्यागेन निष्पन्नः। इति व्याकरणम्॥

त्यागी, [ न् ] त्रि, ( त्यजतीति। त्यज्+"सम्पृचानुरुधाङ्यमेति।" ३।२।१४२। इति घिनुण्।) दाता। (यथा, पञ्चतन्त्रे।१।२५९।
"त्यागिनि शूरे विदुषि च संसर्गरुचिर्जनो गुणी
भवति॥")
शूरः। इति मेदिनी। ने, ७१॥ वर्ज्जनशीलः। यथा,—
"यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति भगवद्गीता।१८।११।
कर्म्मफलत्यागवान्। यथा,—
"न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी च्छिन्नसंशयः॥
न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति श्रीभगवद्गीतायां १८।१०-११।

त्याज्यः, त्रि, ( त्यज्यते इति। त्यज+कर्म्मणि ण्यत्। "त्यजेश्च।" इति ७।३।६६। इत्यस्य वार्त्तिकोक्त्या न कुत्वम्।) त्यागयोग्यः। वर्ज्जनीयः। यथा, प्रायश्चित्ततत्त्वे।
"तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः॥"
( यथा च देवीभागवते।१।११।५९।
"तारामप्यनुरक्ता च यथा न तु तथा गुरौ।
अनुरक्ता कथं त्याज्या धर्म्मतो न्यायतस्तथा॥")

त्रक, इ ङ गतौ। इति कविकल्पद्रुमः॥ ( भ्वां-आत्मं-सकं-सेट्।) दन्त्यवर्गादिः। इ, त्रङ्क्यते। ङ, त्रङ्कते। इति दुर्गादासः॥

त्रग, इ गतौ। इति कविकल्पद्रुमः॥ ( भ्वां-परं-सकं-सेट्।) इ, त्रङ्ग्यते। इति दुर्गादासः॥

त्रङ्गः, पुं स्त्री, ( त्रङ्गति शोभादिकं गच्छतीति। त्रङ्ग+अच्।) पुरविशेषः। इति त्रिकाण्डशेषः॥

त्रद, इ चेष्टे। इति कविकल्पद्रुमः॥ ( भ्वां-परं-अकं-सेट्।) दन्त्यवर्गाद्यादिः। इ, त्रन्द्यते तत्रन्द। इति दुर्गादासः॥

त्रप, ऊ ष मि ङ ह्रियि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-वेट्।) ऊ, अत्रपिष्ट अत्रप्त। ष, त्रपा। मि, त्रपयति त्रापयति। ङ, त्रपते। ह्रियि लज्जायाम्। इति दुर्गादासः॥

त्रपा, स्त्री पुं, ( त्रप्यते इति। त्रप+"षिद्भिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। ततष्टाप्।) लज्जा। इत्यमरः।१।७।२३॥ ( यथा, रत्नावल्याम्।
"नीचं षर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं
वामनः॥"
त्रपते अनया अस्याः वा। करणे अपादाने वा अङ्।) कुलटा। इति मेदिनी। पे, ७॥ कुलम्। कीर्त्तिः। इति शब्दरत्नावली॥

त्रपाकः, पुं, ( त्रपते लज्जते इति। त्रप+"आकः खजादेः।" १।२१९। इति उणादिकोषटीकाधृतसूत्रात् आकः।) म्लेच्छविशेषः। इत्युणादिकोषः॥

त्रपारण्डा, स्त्री, ( त्रपायां रण्डेव। लज्जाहीनत्वादेव तथात्वम्।) वेश्या। इति जटाधरः॥

त्रपिष्ठः, त्रि, ( अयमेषामतिशयेन तृप्रः। तृप्र+"अतिशायने तमबिष्ठनौ।" ५।३।५५। इति इष्ठन्। "प्रियस्थिरेति।" ६।४।१५७। इति तृप्रस्य त्रप्-आदेशः।) अतिलज्जितः। इति मुग्धबोधम्॥

त्रपीयान्, [ स् ], त्रि, (अयमनयोरतिशयेन तृप्रः। तृप्र+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "प्रियस्थिरेति।" ६।४।१०७। इति तृप्रस्य त्रबादेशः।) त्रपिष्ठः। इति व्याकरणम्॥